# Shankarakritam Ganesha Stotram

# शाङ्करकृतं गणेशस्तोत्रम्

## Document Information

Text title : Shankarakritam Ganesha Stotram

File name : shankarakRRitaMgaNeshastotram.itx

Category : ganesha, viShNudharmottarapurANa, stotra

Location : doc_ganesha

Proofread by : PSA Easwaran

Description/comments : viShNudharmottarapurANa | khaNDa 1 | adhyAya 225/2-9||

Latest update : April 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2025

*sanskritdocuments.org*

# शङ्करकृतं गणेशस्तोत्रम्

शङ्कर उवाच ।
नमस्यामि महाबाहुं देवदेवं गणेश्वरम् ।
हस्तिवक्त्रं महाकायं व्याघ्रचर्माम्बरच्छदम् ॥ २॥

चन्द्ररश्मिप्रतीकाशं चारुदंष्ट्रोज्ज्वलाननम् ।
भक्तानां विघ्नशमनं सुराद्यं पार्वतीसुतम् ॥ ३॥

परश्वधधरं वीरमक्षमालाविभूषितम् ।
ब्रह्मण्यं वरदं सौम्यं विघ्नानां पतिमूर्जितम् ॥ ४॥

पीनास्यं लम्बजठरं हारभारार्पितोदरम् ।
अष्टमी च चतुर्थी च वृता येन चतुर्दशी ॥ ५॥

कुल्माषोत्क्रोपिकापूपैर्मोदकैरोदनेन च ।
पूजयन्ति जना लोके धूपमाल्यानुलेपनैः ॥ ६॥

स्वस्तिवाचनकैश्चैव तेषां नास्तीह दुर्लभम् ।
पुत्रार्थी लभते पुत्रान्धनार्थी धनमुत्तमम् ॥ ७॥

व्याधितश्च तथाऽऽरोग्यं बद्धो मुच्येत बन्धनात् ।
त्वां तु सम्पूजयित्वा वै वरदं कामरूपिणम् ॥ ८॥

इष्टान्कामानवाप्नोति नात्र कार्या विचारणा ।
यश्चाधीते स्तवमिमं तव नित्यं गणेश्वर ॥ ९॥

तस्यापि सर्वकामानां सदा दाता भविष्यसि ।

इति विष्णुधर्मोत्तरपुराणे प्रथमखण्डे २२५-अध्यायान्तर्गतं
शङ्करकृतं गणेशस्तोत्रं सम्पूर्णम् ।

विष्णुधर्मोत्तरपुराण । खण्ड १। अध्याय २२५/२-९॥

viShNudharmottarapurANa . khaNDa 1. adhyAya 225/2-9..

Proofread by PSA Easwaran

*Shankarakritam Ganesha Stotram*

pdf was typeset on April 5, 2025

Please send corrections to *sanskrit@cheerful.com*